॥ श्रीगणेशाय नमः॥

श्री वरदराजाचार्यप्रणीता

लघुसिद्धान्तकौमुदी

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।।

गणराजं गुरुं नत्वा शारदां कुलदेवताम्।
बालानां सुखबोधाय, व्याख्यामेतां करोम्यहम्।।

१. कौमुदी चन्द्रिका। मोदते इति मुदः, हर्ष आनन्दो वा। कोः पृथिव्याः मुदः कुमुदः, यद्वा कौ पृथिव्यां मुदः येन यस्माद् वा असौ कुमुदः = चन्द्रमाः। तस्य कुमुदस्य इयं कौमुदी अर्थात् प्रकाशिका ज्योत्स्ना वा। वैयाकरणानां = व्याकरणाध्येतॄणां व्याकरणवेत्तॄणां वा ये सिद्धान्ताः निर्णीतार्थाः, तेषां कौमुदी इव कौमुदी इति सिद्धान्तकौमुदी। लघ्वी चासौ सिद्धान्तकौमुदी इति लघुसिद्धान्तकौमुदी अथवा लघवः=अल्पाः (न सर्वे) सिद्धान्ताः लघुसिद्धान्ताः तेषां कौमुदी इति लघुसिद्धान्तकौमुदी। चन्द्रिका यथा अन्धकारं निरस्य पदार्थान् सुखं प्रकाशयति, तथा इयमपि ग्रन्थरूपा कौमुदी वैयाकरणानां सिद्धान्तान् सारल्येन प्रकाशयति, बालान् बोधयति। अतः अस्याः कौमुदीसादृश्यात् कौमुदीत्वमिति ज्ञेयम्।

२. अहं (वरदराजाचार्यः) शुद्धां = दोषशून्यां निर्मलां वा गुण्यां = प्रशस्तगुणोपेतां

अथ संज्ञाप्रकरणम्

अ इ उ ण् ।१। **ऋ लृ क् ।२।** **ए ओ ङ् ।३।**
ऐ औ च् ।४। **ह य व र ट् ।५।** **ल ण् ।६।**
ञ म ङ ण न म् ।७। **झ भ ञ् ।८।** **घ ढ ध ष् ।९।**
ज ब ग ड द श् ।१०। **ख फ छ ठ थ च ट त व् ।११।**
क प य् ।१२। **श ष स र् ।१३।** **ह ल् ।१४।**

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इत:। हकारादिष्वकार उच्चारणार्थ:। लण्मध्ये त्वित्संज्ञक:।

(सत्त्वरजस्तमसां मध्ये सत्त्वगुणस्यैव प्रशस्तत्वात् गुणशब्देन अत्र सत्त्वगुणस्यैव ग्रहणात् सत्त्वगुणप्रधानाम् इत्यर्थ:) सरस्वतीं = ज्ञानाधिष्ठात्रीं वाग्देवतां नत्वा=प्रणम्य पाणिनीयप्रवेशाय=पाणिनिप्रोक्ते शब्दशास्त्रे सुकुमार-मतीनां बालानां प्रवेशो यथा स्यात् तथा कर्तुं ''लघुसिद्धान्तकौमुदी'' इति नाम्नीं रचनां पुस्तिकां वा करोमि = रचयामि।

३. एतानि चतुर्दशसूत्राणि माहेश्वराणि सूत्राणि कथ्यन्ते, यतो हि महर्षि: पाणिनि: तपो विधाय भगवत: महेश्वरात् इमानि प्राप्तवान्। महेश्वरात् आगतानि, अत: इमानि माहेश्वराणि इति उच्यन्ते। यथोक्तं नन्दिकेश्वरेण काशिकायाम्
नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकाम: सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥ इति

४. किमर्थानि एतानि ? इति प्रश्ने आह - अणादिसंज्ञार्थानि। अण् आदि: यासां ता: अणादय:, ता: संज्ञा: अणादिसंज्ञा:। अणादिसंज्ञा: अर्थ: प्रयोजनं येषां, तानि (माहेश्वरसूत्राणि) अणादिसंज्ञार्थानि। अर्थात् अणादिसंज्ञा: एव एषां प्रयोजनमस्तीति भाव:। एभिरेव सूत्रै: अणादय: प्रत्याहारा: निर्मीयन्ते इत्याशय:।

५. एषां प्रत्येकं सूत्राणाम् अन्ते भवा: वर्णा: (अन्त्या: णादय: वर्णा:) इत्संज्ञका: सन्ति।

६. 'ह य व र ट्' इत्यत: आरभ्य व्यञ्जनवर्णा: उपदिश्यन्ते, तत्र प्रतिवर्णं पुन: पुन: अकारोच्चारणं किमर्थम् ? किं हलादिप्रत्याहारे अकारस्य अपि ग्रहणं

१.	**हलन्त्यम् १/३/३**
उपदेशेऽन्त्यं हलित् स्यात्। उपदेश आद्योच्चारणम्। सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र।।

२.	**अदर्शनं लोपः १/१/६०**
प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्।

३.	**तस्य लोपः १/३/९**
तस्येतो लोपः स्यात्। णादयोऽणाद्यर्थाः[१]।

भवति वा ? इति जिज्ञासायाम् आह – तत्र हकारादिषु अकारः उच्चारणार्थः, न किमपि तस्य अन्यत् प्रयोजनम्। विना स्वरं व्यञ्जनानामुच्चारणं न भवति इति हेतोः तत्र प्रतिव्यञ्जनं पुनः पुनः अकारोच्चारणमिति भावः। लण् सूत्रे तु लकारात् परः यः अकारः स न केवलः उच्चारणप्रयोजनकः, अपि तु इत्संज्ञकः सः। तेन च रप्रत्याहारः सिद्ध्यति इति कैय्यटेन कृता कल्पना, तामेव कैय्यटकल्पनाम् अनुसृत्य भट्टोजिदीक्षितः वरदराजाचार्यश्चापि लिखति–'लण्मध्ये त्वित्संज्ञकः' इति।

१.	**हलन्त्यम्** – हल् + अन्त्यम् इतिच्छेदः।

पाणिनेः अष्टाध्याय्याम् अष्टौ अध्यायाः सन्ति। प्रत्यध्यायं चत्वारः पादाः, प्रतिपादं च नैकानि सूत्राणि सन्ति। अत्र सूत्राणाम् अग्रे उल्लिखिता संख्या क्रमशः अध्यायस्य, पादस्य, सूत्रस्य च बोधिका अस्ति। यथा अस्मिन् सूत्रे १।३।३ इति संख्या बोधयति यदिदं प्रथमाध्यायस्य तृतीयपादस्य तृतीयं सूत्रम् अस्ति। इदं सूत्रम् उपदेशे विद्यमानस्य अन्त्यस्य हलः = व्यञ्जनस्य इत्संज्ञां करोति। उपदेशः कः ? इति प्रश्ने आह – उपदेशः आद्योच्चारणम् इति। आद्यमुच्चारणम्, आद्यानां पाणिन्यादिमुनीनाम् उच्चारणं वा उपदेशः उच्यते। केचन तु

''धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशाः उपदेशाः प्रकीर्तिताः।। इति उपदेशाः इति मन्यन्ते।

अतः एषां धात्वादीनाम् अन्त्यस्य हलः अनेन सूत्रेण इत्संज्ञा विधीयते।

'हलन्त्यम्' इत्येतावत् एवं सूत्रमस्ति, किन्तु अस्य विवरणे वृत्तौ 'उपदेशे' 'इत्' इति पदद्वयम् अधिकं लिखितं, तत् कुतः समायातमिति प्रश्ने आह–'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र' इति। अर्थात् सूत्रे साक्षाद् अनुल्लिखितमपि सूत्रार्थज्ञानाय अपेक्षितं पदं सूत्रान्तराद्= अन्यस्मात्सूत्रात् अनुवर्तनीयं भवति। अतः अत्र 'उपदेशे' 'इत्' इति पदद्वयं 'हलन्त्यम्' इति सूत्रे अनुल्लिखितमपि सत् ''उपदेशेऽजनुनासिक इत्'' इति सूत्राद् अनुवृत्तिद्वारा आगच्छति इति भावः।

२.	**अदर्शनं लोपः** – शास्त्रतः प्रसक्तस्य प्राप्तोच्चारणस्य उच्चारणाभावः अत्र अदर्शनपदस्य अर्थः। अर्थात् उपदेशे विद्यमानसत्ताकस्य वर्णसमुदायस्य तदंशस्य वा उच्चारणाभावः लोपसंज्ञकः भवति। विद्यमानस्यापि दर्शनाभावः = श्रव्यत्वाभावः लोपः इति उच्यते इति भावः।

३.	**तस्य लोपः** – तस्य इतः=इत्संज्ञकस्य लोपो भवति अर्थात् यस्य वर्णस्य इत्संज्ञा क्रियते, तस्य वर्णस्य लोपः = अदर्शनम्=उच्चारणाभावः वा भवति।

१. प्रतिमाहेश्वरसूत्रम् अन्त्यः वर्णः इत्संज्ञकः इति उक्तम्, यस्य च इत्संज्ञा भवति, तस्य च लोपः अपि भवति इत्यपि उक्तम्। अतः एतादृश्यां स्थितौ सूत्रान्त्यानां ण्क्ङ्चादीनां माहेश्वरसूत्रेषु पाठस्य कः लाभः ? तेषाम् तु लोपः भविष्यत्येव, अतः ते णादयः किमर्थाः इति प्रश्ने आह – 'णादयोऽणाद्यर्थाः' इति।अर्थात् एते णादयः अणादिप्रत्याहारप्रयोजनकाः सन्ति। एतेषाम् इत्संज्ञकत्वात् एभिः अणादयः प्रत्याहाराः रचयिष्यन्ते इति भावः। अणादि प्रत्याहाराः अर्थः प्रयोजनं येषां ते अणाद्यर्थाः।

४. **आदिरन्त्येन सहेता १/१/८१**

अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। यथाऽणिति अ इ उ वर्णानां संज्ञा। एवमच्हल् अल् इत्यादय:।

५. **ऊकालोऽज्झ्रस्वदीर्घप्लुतः १/२/२८**

उश्च ऊश्च ऊ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा।

६. **उच्चैरुदात्तः १/२/२९**

ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्।

---

४ **आदिरन्त्येन सहेता** – आदिः अन्त्येन सह इता इतिच्छेदः। अन्त्येन इत्संज्ञकेन सह आदिः मध्यवर्तिनां स्वस्य च संज्ञा भवति। यथा 'अ इ उ ण्' इत्यत्र अन्त्यः ण् वर्णः इत्संज्ञकः। तेन इत्संज्ञकेन सह आदिः 'अण्' इति मध्यवर्तिनोः 'इ उ' इत्यनयोः स्वस्य च (आदेः अकारस्य) संज्ञा = बोधकः भवति, अतः तादृशः आदिः 'अण्' इति 'अ इ उ' इति वर्णत्रयस्य संज्ञा भवति। अन्त्यस्य इतः तु तत्र ग्रहणं न भवति। एवमेव अच् हल् अलित्यादयः प्रत्याहारा अपि बोध्याः। तद्यथा –अन्त्येन इता 'च्' इत्यनेन सह आदिः 'अच्' इति 'अ इ उ ऋ लृ ए ओ ऐ औ' इत्येतेषां वर्णानां संज्ञा भवति। 'हल्' इति तु 'ह य व र ट्' इत्यतः आरभ्य सर्वेषां व्यञ्जनानां संज्ञा। अल् इति तु स्वराणां व्यञ्जनानां समेषां संज्ञा, अतः 'अल्' इति वर्णपर्यायः। 'हल्' इति प्रत्याहारे आदित्वेन 'ह य व र ट्' सूत्रस्थः हकारः ग्राह्यः, न तु चतुर्दशतमसूत्रस्थः इति विशेषः। पाणिनीयतन्त्रे सूत्रेषु वार्तिकेषु च व्यवहृतानां प्रत्याहाराणां संख्या ४२ वर्तते, तद्यथा अक्, अच्, अट्, अण्, अण् अम्, अल्, अश् इक्, इच्, इण्, उक्, एङ्, एच्, ऐच्, खय्, खर्, ङम्, चय्, चर्, छव्, जश्, झश्, झय्, झर्, झल्, झष्, बश्, भष्, मय्, यञ्, यण्, यम्, यय्, यर्, रल्, वल्, वश्, शर्, शल्, हल्, हश् इति।

५. **ऊकालः अच् ह्रस्वदीर्घप्लुतः** इति पदच्छेदः। 'वः' इति 'ऊ' इत्यस्य प्रथमाबहुवचने रूपम्। 'वाम्' इति तु तस्य षष्ठीबहुवचने। 'उ' इत्यस्य 'ऊ' इत्यस्य 'ऊ ३' इत्यस्य च उच्चारणे यः कालः अपेक्ष्यते सः 'ऊकालः। ऊकाल इव कालः यस्य अचः, सः अच् ऊकाल इत्युच्यते। तादृशः ऊकालः अच् क्रमशः ह्रस्वः, दीर्घः, प्लुतश्च संज्ञः भवति। अयमाशयः – 'उ' इति एकमात्रिकस्य उच्चारणे यः कालः, तादृशः कालः यस्य अचः, स अच् ह्रस्वसंज्ञकः। यस्य 'ऊ' इति द्विमात्रिकस्य उच्चारणकालसदृशः कालः, स अच् दीर्घसंज्ञकः। यस्य च 'ऊ३' इतिवत् उच्चारणकालः (त्रिमात्रिकोच्चारणकालसदृशःकालः) स अच् प्लुतसंज्ञकः भवति इति ज्ञेयम्। 'ऊ' शब्दः अत्र एकमात्रद्विमात्रत्रिमात्रकुक्कुटरुतस्य अनुकरणपरः। स च ह्रस्वः दीर्घः प्लुतश्च प्रत्येकम् उदात्तादिभेदत्रयेण त्रिधा भिद्यते। के सन्ति उदात्तादयः? अत वक्ष्यते 'उच्चैरुदात्तः इत्यादि।

६. **उच्चैरुदात्तः** – उच्चैः उदात्तः इतिच्छेदः। अत्र उच्चैः इति शब्दः अधिकरण शक्तिप्रधानः ऊर्ध्वभागेऽर्थे विद्यते। नादधर्मविशेषः उच्चैस्त्वं तु अत्र न विवक्षितं, तथा सति उपांशूच्चारणे स्वरस्य उदात्तता न स्यात्। ताल्वादिस्थानानाम् ऊर्ध्वम् अधः मध्यश्च इति भागाः भवन्ति, तेषु सभागेषु ताल्वाद्युच्चारणस्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तसंज्ञः भवति इत्यर्थः।

७. **नीचैरनुदात्तः १।२।३०**

तात्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्।

८. **समाहारः स्वरितः १/२/३१**

यस्मिन् उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते सोऽच् स्वरितसंज्ञः स्यात्।

स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा।

९. **मुखनासिकावचनोऽनुनासिकः १/१/८**

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम् –

---

७. नीचैः अनुदात्तः इतिच्छेदः। अत्र नीचैः इतिशब्दः अपि अधिकरणशक्तिप्रधानः सन् अधोभागेऽर्थे वर्तते। अतः ताल्वादिषु सभागेषु उच्चारणस्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसंज्ञः भवति इति सूत्राशयः।

८. यस्मिन् स्वरे उदात्तत्वस्य अनुदात्तत्वस्य च उभयोः वर्णधर्मयोः समाहारः भवति सः अच् स्वरितसंज्ञः भवति।

इत्थम् उदात्तानुदात्तस्वरिताः वर्णधर्माः कथिताः। लब्धह्रस्वदीर्घप्लुतसंज्ञः अच् प्रत्येकम् उदात्तानुदात्तस्वरित रूपभेदत्रयेण त्रिधा सन् नवविधः सञ्जातः। स च नवविधः अच् प्रत्येकम् अनुनासिकत्वधर्मेण अननुनासिकत्वध र्मेण च पुनः द्विधा भवति = द्विप्रकारकः भवति। कोऽयम् अनुनासिकत्वधर्मः ? को वा अनुनासिकः ? इति जिज्ञासायां यथाप्रसङ्गं वक्ष्यते – 'मुखनासिका०' इत्यादि।

९. मुखनासिकावचनः अनुनासिकः। मुखेन सहिता मुखसहिता। मुखसहिता च असौ नासिका, मुखनासिका, शाकपार्थिवादिसमासः उत्तरपदस्य 'सहिता' इत्यस्य लोपश्च। मुखद्वितीया नासिका मुखनासिका इति वा विग्रहः कार्यः। अत्रापि पूर्ववदेव समासः। उच्यते उच्चार्यते इति वचनः, अत्र कर्मणि ल्युट्। मुखनासिकया वचनः इति मुखनासिका वचनः अर्थात् मुखसहितनासिकया अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादशभेदाः। लृवर्णस्य द्वादश तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।उच्चार्यमाणः वर्णः अनुनासिकसंज्ञः भवति। मुखं विना केवलया नासिकया उच्चारणासंभवात् मुखेन सहिता नासिका इत्युक्तम्। यस्य च केवलेन मुखेन एव उच्चारणं भवति, स वर्णः अननुनासिक कथ्यते। इत्थं स्पष्टं यत् मुखनासिकया उच्चार्यमाणः अनुनासिकः। केवलेन मुखेन – उच्चरितः अननुनासिकः भवति। अत्र मुखं च नासिका च इत्येवं द्वन्द्वसमासः न मन्तव्यः, अनयोः प्राण्यङ्गत्वात् एकवत्त्वस्य, समाहारस्य नपुंसकत्वात् ह्रस्वत्वस्य च आपत्तेः।

इत्थं नवविधः सः अच् अनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा पुनः भवति, अतः अनेन पथा अ इ उ ऋ इत्येते वर्णाः प्रत्येकमष्टादशभेदवन्तः सञ्जाताः। लृवर्णः द्वादशभेदवान्, सः दीर्घः न भवति, अतः अस्य तन्मूलकाः षड्भेदाः न्यूनाः भवन्ति। लृवर्णस्य दीर्घत्वं न भवति, इत्यत्र महाभाष्यमेव प्रमाणम्, होतृ+लृकारः इत्यत्र होतॄकारः इत्येवं दीर्घविधानज्ञापनात्। एवमेव एच्प्रत्याहारगताः ए ओ ऐ औ इत्येते वर्णाः अपि प्रत्येकं द्वादशभेदवन्तः। तेषां ह्रस्वत्वं न भवति, अतः ह्रस्वमूलकाः षड्भेदाः न्यूनाः। अत्र अचां भेदविवरणतालिका द्रष्टव्या –

अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादशभेदाः। लृवर्णस्य द्वादश तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।

१०. तुल्यास्यप्रयत्नं सवर्णम् १/१/९

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसञ्ज्ञं स्यात्। (ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्)। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य। यत्नो द्विधा-आभ्यन्तरो बाह्यश्च। आद्यः पञ्चधा-स्पृष्ट-ईषत्स्पृष्ट-ईषद्विवृत-विवृत-संवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तः स्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्।

अ इ उ ऋ लृ ह्रस्वभेदाः	अ इ उ ऋ ए ओ ऐ औ दीर्घभेदाः	अ इ उ ऋ लृ ए ओ ऐ औ प्लुतभेदाः
ह्रस्व-उदात्तानुनासिकः	दीर्घ-उदात्तानुनासिकः	प्लुत-उदात्तानुनासिकः
ह्रस्व-उदात्ताननुनासिकः,	दीर्घ-उदात्ताननुनासिकः	प्लुत-उदात्ताननुनासिकः
ह्रस्व-अनुदात्तानुनासिकः	दीर्घ-अनुदात्तानुनासिकः	प्लुत-अनुदात्तानुनासिकः
ह्रस्व-अनुदात्ताननुनासिकः	दीर्घ-अनुदात्ताननुनासिकः	प्लुत-अनुदात्ताननुनासिकः
ह्रस्व-स्वरितानुनासिकः	दीर्घ-स्वरितानुनासिकः	प्लुत-स्वरितानुनासिकः
ह्रस्व-स्वरिताननुनासिकः	दीर्घ-स्वरिताननुनासिकः	प्लुत-स्वरिताननुनासिकः

अत्र दीर्घभेदप्रदर्शकपङ्क्तौ लृकारस्य उल्लेखः नास्ति तथा ह्रस्वभेदप्रदर्शने ए ओ ऐ औ इति वर्णानाम् उल्लेखः नास्ति।

ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। बाह्यप्रयत्नस्त्वेकादशधा - विवारः, संवारः, श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। खरो विवाराः श्वासा अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमा: यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। कादयो मावसानाः स्पर्शाः। यणोऽन्तःस्थाः। शल ऊष्माणः। अचः स्वराः। ×क ×ख इति कखाभ्यां यत्नः वा प्रयत्नः। आस्यं च प्रयत्नः च आस्यप्रयत्नौ। तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत् तुल्यास्यप्रयत्नं वर्णजालं परस्परं सवर्णसंज्ञं भवति इति सूत्राशयः। अतः मुखे भवं ताल्वादिस्थानम्, आभ्यन्तरप्रयत्नश्च इति एतद्द्वयं यस्य वर्णस्य येन वर्णेन तुल्यं भवति तौ वर्णौ परस्परं सवर्णौ भवतः। ऋकारलृकारयोः भिन्नस्थानजन्यत्वात् विशेषवचनद्वारा सावर्ण्यं विधीयते 'ऋलृवणयोर्मिथः सावर्ण्यं वाच्यम्' इति।कस्य वर्णस्य किं स्थानं, कश्च प्रयत्नः? इति जिज्ञासायां शिक्षावचनानि अर्थतः संगृह्णाति - अकुहविसर्जनीयानां कण्ठः इत्यादि। अत्र कु चु टु तु पु इति कादिवर्गपञ्चकस्य बोधकाः, अर्थात् कु = क ख ग घ ङ इति। एवमेव चु टु तु पु विषयेऽपि ज्ञेयम्। अ, क, ख, ग, घ, ङ, ह, विसर्गश्च एषां वर्णानाम् उच्चारणस्थानं कण्ठः। इ, च, छ, ज, झ, ञ, य, श एषां स्थानं तालु। ऋ, ट, ठ, ड, ढ, ण, र, ष एषां स्थानं मूर्धा। लृ, त, थ, द, ध, न, ल, स एषां स्थानं दन्ताः। अत्र दन्तशब्देन दन्तमूलं ग्राह्यम्, अन्यथा तु भग्नदन्तस्य एषां वर्णानामुच्चारणमेव न स्यात्। उ, प, फ, ब, भ, म, उपध्मानीयश्च एषां स्थानम् ओष्ठौ। उपध्मानीयः, जिह्वामूलीयः, विसर्गः, अनुस्वारश्च कः इति अग्रे व्याख्यास्यते। ञ म ङ ण न इति प्रतिवर्गं पञ्चमवर्णस्य नासिकाऽपि स्थानमधिकम्। स्वस्ववर्ग्यं स्थानं तु ताल्वादि तेषाम् अस्त्येव, अतः एषां वर्गपञ्चमानां द्वे द्वे स्थाने स्तः इति विज्ञेयम्। एकारस्य ऐकारस्य च कण्ठतालु, ओकारस्य औकारस्य च कण्ठोष्ठम् उच्चारणस्थानम्। वकारस्य दन्तोष्ठं, जिह्वामूलीयस्य जिह्वामूलम्, अनुस्वारस्य च नासिका स्थानमिति वर्णानां स्थानवर्णनम्। प्रसङ्गप्राप्तस्य प्रयत्नस्य विवरणम् - यत्नः द्विधा - आभ्यन्तरःबाह्यश्च। सूत्रे प्रयत्नशब्देन आभ्यन्तरस्य यत्नस्य ग्रहणं बोध्यम्। प्रकृष्टता च तस्य वर्णोच्चारणात् प्राग्भावित्वेन विज्ञेया। बाह्यस्य यत्नस्य बाह्यत्वं तु वर्णोच्चारणानन्तरं तस्य जायमानत्वात् विज्ञेयम् इति शिक्षाग्रन्थेषु स्पष्टम्। तत्र आद्यः = आभ्यन्तरप्रयत्नः पञ्चधा - स्पृष्टम्, ईषत्स्पृष्टम्, ईषद्विवृतम्, विवृतम्, संवृतम् इति। तत्र स्पर्शसंज्ञकानाम् आभ्यन्तरप्रयत्नः

स्पृष्टम्। के स्पर्शाः ? कादयो मावसानाः स्पर्शाः इत्यनुपदमेव वक्ष्यते। अर्थात् लोके यः वर्णक्रमः प्रसिद्धः कवर्गचवर्गटवर्गतवर्गपवर्गरूपः, तत्र ककारात् आरभ्य पवर्गस्य पञ्चमवर्णं यावत् ये पञ्चविंशतिः वर्णाः, ते स्पर्शाः इति भावः। ईषत्स्पृष्टम् अन्तःस्थवर्णानां प्रयत्नः। के अन्तःस्थाः ? यणः अन्तःस्थाः। अर्थात् 'यवरल' एषां वर्णानाम् ईषत्स्पृष्टं प्रयत्नः। ईषद्विवृतं प्रयत्नः ऊष्मवर्णानाम्। के ऊष्माणः ? शलः इति। अर्थात् शल्प्रत्याहारगताः शषसहाःवर्णाः ऊष्मसंज्ञकाः, तेषामाभ्यन्तरप्रयत्नः ईषद्विवृतम्। स्वराणां विवृतं प्रयत्नः। के स्वराः ? अचः स्वराः। अर्थात् 'अ इ उ ऋ लृ ए ओ ऐ औ' इति अच्प्रत्याहारान्तर्गताः वर्णाः स्वराः उच्यन्ते, तेषां विवृतं प्रयत्नः। तर्हि संवृतं कस्य प्रयत्नः? इति प्रश्ने आह - ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु तस्य विवृतमेव। अर्थात् यत्र केवलस्य ह्रस्वस्य एकमात्रिकस्य अकारस्य प्रयोगः तत्र तस्य संवृतं प्रयत्नः। यत्र तस्य दीर्घत्वादिप्रक्रियाकार्यं सम्पादनीयं भवति, तत्र तस्य पुनः विवृतमेव प्रयत्नः भवति इति ज्ञेयम्। प्रक्रियायां तस्य यदि विवृतत्वं न भवेत् तर्हि देव+आलयः इत्यत्र ह्रस्वाकारस्य संवृतम्, आकारस्य च विवृतम् इत्येवं प्रयत्नभेदात् तयोः सावर्ण्यं न स्यात् ततश्च सवर्णदीर्घसन्धिः एव तत्र न भविष्यति। प्रक्रियायां तस्य अकारस्य अपि विवृतत्वे तु उभयोः प्रयत्नसाम्यात् सावर्ण्ये न काऽपि बाधा इति भावः।बाह्यप्रयत्नः एकादशधा-तद्यथा-विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्च। तत्र कस्य बाह्यप्रयत्न कः ? इति जिज्ञासायाम् आह - खरो विवारा० इत्यादि। अर्थात् ख फ छ ठ थ च ट त क प श ष स इति खर्प्रत्याहार -गतानां वर्णानां विवारः श्वासः अघोषः इति बाह्यप्रयत्नः। ये खलु हश् प्रागर्धविसर्गसदृशो जिह्वामूलीयः। प फ इति पफाभ्यां प्रागध र्विसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ। प्रत्याहारान्तर्गताः 'ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द' वर्णाः, तेषां तु संवारः नादः घोषः इति बाह्यप्रयत्नः। तत्र पुनः प्रत्येकं वर्गस्य प्रथमः, तृतीयः, पञ्चमः अर्थात् क ग ङ, च ज ञ, ट ड ण, त द न, प ब म इति वर्णाः, यणः = य व र लाः च अल्पप्राणाः भवन्ति। अन्ये तु वर्गाणां द्वितीयचतुर्थवर्णाः ख घ, छ झ, ठ ढ, थ ध, फ भ एते तथा शलः = 'श ष स ह' एते च महाप्राणाः उच्यन्ते अर्थात् क्रमशः पूर्वोक्तानाम् अल्पप्राणः, पश्चादुक्तानां च महाप्राणः बाह्यप्रयत्नः। इत्येवं प्रत्येकं व्यञ्जनस्य चतुर्धा बाह्यप्रयत्नः। उदात्तः अनुदात्तः स्वरितश्च इत्येते तु केवलानां स्वराणामेव धर्माः, न तु व्यञ्जनानाम् इति 'उच्चैरुदात्तः' इत्यादौ स्पष्टम्। इत्थं विवारश्वासाघोषेषु च ट त क प इति वर्णाः अल्पप्राणाः, ख फ छ ठ थ श ष स इति वर्णाः महाप्राणाः। संवारनादघोषेषु य व र ल ञ म ङ ण न ज ब ग ड द इत्यल्पप्राणाः, शेषवर्णाः = ह झ भ घ ढ ध एते महाप्राणाः इति निर्णयः। तत्र स्पर्शादयः के ? इति तु व्याख्यातम्। इदानीं जिह्वामूलीयादिविषये आह - ककारात् खकारात् वा प्राग् अर्धविसर्गसदृशः जिह्वामूलीयः, पकारात् फकारात् वा प्राग् तादृश एव उपध्मानीयः इति उच्यते। अचः परः अनुस्वारः अं, इं इत्यादिरूपः, विसर्गश्च अपि अचः परः अः, इः इत्यादिरूपः शब्दप्रयोगे उपलभ्यते। अर्थात् अनुस्वार विसर्गौ एतादृशौ भवतः इति भावः। वर्णानां सवर्णसंज्ञायां स्थानस्य आभ्यन्तरप्रयत्नस्य च हेतुत्वम् अस्ति, अतः तयोः विवेचनं तु सार्थकं किन्तु बाह्ययत्नस्य तु तत्र सवर्णसंज्ञायाम् उपयोग एव न भवति, अतः तस्य प्रपञ्चः व्यर्थः इति शङ्कायां वक्तव्यम्-बाह्ययत्नस्य सावर्ण्ये उपयोगाभावेऽपि वर्णानां सादृश्यपरीक्षायाम्
उपयोगः भवति एव, अतः तदर्थं कृतः अयं प्रपञ्चः सार्थक एव, न व्यर्थः इति।

११. अणुदित्सवर्णस्य चाप्रत्ययः १/१/६९

प्रतीयते विधीयते इति प्रत्ययः। अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्। अत्रैवाण् परेण णकारेण। कु चु टु तु पु एते उदितः। तदेवम् 'अ' इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः एवं लृकारोऽपि। एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन यवला द्विधा, तेनाननुनासिकास्ते द्वयोर्द्वयोस्संज्ञा।

१२. परः सन्निकर्षः संहिता १/४/१०९

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।

---

११. अणुदित् सवर्णस्य च अप्रत्ययः इति पदच्छेदः। अप्रत्ययः अण् उदित् च सवर्णस्य संज्ञा अर्थात् ग्राहकः भवति। प्रतीयते=विधीयते=यः सूत्रेण क्रियते असौ प्रत्ययः अर्थात् आदेशः आगमः प्रत्ययश्च। यः सूत्रेण न क्रियते न विधीयते आदेशत्वेन आगमत्वेन प्रत्ययत्वेन वा असौ अप्रत्ययः। तादृशः अण् अर्थात् 'अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल' इत्येते वर्णाः सवर्णान् ग्राहयन्ति। यः विधीयमानः अण् आगमरूपः आदेशरूपः प्रत्ययरूपो वा स सर्वणस्य संज्ञा न भवति। किन्तु यः निमित्तरूपः अण्, उद्देश्यरूपो वा अण्, स सवर्णस्य संज्ञा ग्राहकः वा भवति, तस्य अविधीयमानत्वात्। अतः 'इको यणचि' इत्यादौ निमित्तरूपः अच्, उद्देश्यरूपः इक् (उभावपि अणन्तर्गतौ) सवर्णान् ग्राहयतः। एवम् उदित् विधीयमानः अपि सवर्णस्य संज्ञा भवति। के उदितः ? कु चु टु तु पु एते उदितः। अर्थात् एते पञ्चविंशतिः वर्णा विधीयमाना अपि सवर्णान् ग्राहयन्ति। अण् इति परणकारेण पूर्वणकारेण वा इति सन्देहे सति आह–अत्रैवाण्–इति। अर्थात् सम्पूर्णे पाणिनीयतन्त्रे सर्वत्र पूर्वणकारेण
अण् गृह्यते, किन्तु केवले अस्मिन्नेव सूत्रे परणकारेण ग्राह्यः इति व्याख्यानात् ज्ञायते। अतः अत्र सूत्रे 'अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल' इत्येते वर्णाः अण्संज्ञया ज्ञेयाः। अन्यत्र तु 'अ इ उ' इति वर्णत्रयमेव। इत्थम् अविधीयमानः 'अ' अष्टादशानां सवर्णानां संज्ञा। ह्रस्वदीर्घप्लुतमूलकाः भेदाः पूर्वं प्रपञ्चिताः सन्ति, तत्र द्रष्टव्याः। एवमेव इकारः उकारश्चापि अष्टादशानां संज्ञा। ऋकारलृकारयोः सावर्ण्यात् ऋकारः आत्मनः अष्टादशानाम् लृकारस्य च द्वादशानाम् इत्येवं मिलित्वा त्रिंशतः संज्ञा, लृकारः अपि त्रिंशत एव। एचः प्रत्येकं द्वादशानां संज्ञाः। अर्थात् ए ओ ऐ औ प्रत्येकं वर्णः स्वकीयानां द्वादशानां सवर्णानां बोधकः। ए ऐ इत्यनयोः ओ औ इत्यनयोश्च तुल्यस्थानत्वात् विवृतप्रयत्नवत्त्वाच्च सावर्ण्येन एकारः ऐकारस्य, ओकारः औकारस्य बोधकः, तस्मात् एकारः ओकारश्च चतुर्विंशतेः संज्ञकः इति शंका न करणीया, यतो हि एकारऐकारयोः ओकार–औकारयोः सावर्ण्याभावस्य "ऐ औ च्" इति सूत्रस्य पृथक्करणात् ज्ञापितत्वात्। सति सावर्ण्ये तु 'ए ओ ङ्' इति एकेनैव सूत्रेण सिद्धे 'ऐ औ च्' इति व्यर्थमेव स्यादिति भावः।

यवलाः अनुनासिकाः अननुनासिकाश्च भवन्ति। अतः अननुनासिकाः अपि यवलाः प्रत्येकं द्वयोः द्वयोः संज्ञा। अर्थात् य् इति अनुनासिकस्य अननुनासिकस्य च बोधकः। एवमेव वकारः लकारश्चापि।

१२. संहितासंज्ञाविधायकं सूत्रमिदम्। परः=अतिशयितः, सन्निकर्षः = सामीप्यम् =अर्धमात्राधिककालव्यवधानाभावः। अर्धमात्राकालस्य व्यवधानं तु अवर्जनीयम्। अतः अर्धमात्राधिककाल व्यवधानाभावेन वर्णानां सामीप्यं संहितासंज्ञं भवति, अर्थात् वर्णानाम् उच्चारणे अतिशयितसामीप्यमेव संहिता इति सिद्धम्।

१३. **हलोऽनन्तराः संयोगः १/१/७**
अज्भिरव्यवहिताः हलः संयोगसंज्ञाः स्युः।

१४. **सुप्तिङन्तं पदम् १/४/१४**
सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।

इति संज्ञाप्रकरणम्

---

१३. **हलोऽनन्तराः संयोगः** सूत्रमिदं संयोगसंज्ञाविधायकम्। अज्भिः = स्वरसंज्ञकैः वर्णैः अव्यवहिताः = व्यवधानरहिताः हलः=व्यञ्जनवर्णाः संयोगसंज्ञकाः भवन्ति।

१४. सुप् इति 'स्वौजसमौट्०' इति सूत्रगतप्रत्ययानाधारीकृत्य प्रत्याहारः, तिङ् इत्यपि ''तिप्तस्झि०'' इत्याधारीकृत्य प्रत्याहार एव। सुप्प्रत्ययः अन्ते यस्य, तिङ् प्रत्ययः वा अन्ते यस्य तत् सुबन्तं तिङन्तम्। तादृशं सुबन्तं तिङन्तं च पदसंज्ञकं भवति। अर्थात् अनेन सूत्रेण पदसंज्ञा विधीयते। रामः, देवी, वधूः, चित्रम् इत्यादयः सुबन्ताः। पठति, एधते, अपाठीत्, भविष्यति इत्यादयः तिङन्ताः शब्दाः।, अतः एते पदसंज्ञकाः सन्तीति भावः।

इति संज्ञाप्रकरणम्

अभ्यासप्रश्नाः

१. उपदेशे अन्त्यम् इत् भवति –
(क) अच् (ख) हल्
(ग) विसर्गः (घ) अनुस्वारः ( )

२. इत्संज्ञकस्य लोपं करोति –
(क) हलन्त्यम् (ख) अदर्शनं लोपः
(ग) तस्य लोपः (घ) उपदेशेऽजनुनासिक इत् ( )

३. मुखनासिकया उच्चार्यमाणः वर्णः भवति–
(क) अनुस्वारः (ख) व्यञ्जनम्
(ग) अनुनासिकः (घ) स्वरः ( )

४. ऊष्मवर्णाः सन्ति –
(क) शषसहाः (ख) यवरलाः
(ग) कादयो मावसानाः (घ) अचः ( )

५. बाह्ययत्नः भवति
(क) पञ्चधा (ख) षोढा
(ग) दशधा (घ) एकादशधा ( )

६. स्पर्शानां प्रयत्नः भवति
(क) स्पृष्टम् (ख) ईषद्विवृतम्

(ग) विवृतम् (घ) संवृतम् ( )

७. लृवर्णस्य भेदाः भवन्ति –

(क) द्वादश (ख) अष्टादश

(ग) त्रिंशत् (घ) षोडश ( )

८. ऋकारः संज्ञा भवति –

(क) अष्टादशानाम् (ख) त्रिंशतः

(ग) विंशतेः (घ) द्वादशानाम् ( )

९. अनन्तराः हलः भवन्ति –

(क) संहितासञ्ज्ञाः (ख) संयोगसंज्ञाः

(ग) पदसंज्ञाः (घ) विसर्गसंज्ञाः ( )

१०. उदात्तानुदात्तस्वरिताः बाह्ययत्नाः भवन्ति –

(क) अचाम् (ख) खराम्

(ग) हशाम् (घ) वर्णमात्रस्य ( )

लघूत्तरात्मकाः प्रश्नाः –

११. माहेश्वरसूत्राणि कति ? तानि लिखत।

१२. कीदृशः हल् इत्सञ्ज्ञकः भवति ?

१३. हलन्त्यम् इति सूत्रस्य अर्थं लिखत।

१४. कस्य अचः कियन्तः भेदाः ? लिखत।

१५. कौ वर्णौ मिथः सवर्णौ भवतः ? तत्र नियमः कः ?

१६. अकारस्य प्रयत्नः कः ? प्रक्रियादशायां च कः ?

१७. जिह्वामूलीयः वर्णः कः ?

१८. के सवर्णस्य संज्ञाः भवन्ति ?